## शालीनकौपीने अधृष्टाकार्ययोः । (२०/१८२१)

शालीनकौपीनशब्दौ निपात्येते यथासङ्ख्यमधृष्टे अकार्ये चाभिधेये । अधृष्टः अप्रगल्भः । अकार्यमकरणार्हं विरुद्धम्[1] । [2]शालीनकौपीने अधृष्टाकार्ययोः पर्यायौ[3] यथाकथञ्चिद् व्युत्पादयितव्यौ । शालाप्रवेशनमर्हति, कूपावतारमर्हति (म.भा. २.३७४) इति [4]खञ् प्रत्ययः उत्तरपदलोपश्च निपात्यते । शालीनो जडः । कौपीनं [5]पापम् ॥

## व्रातेन जीवति । (२१/१८२२)

निर्देशादेव [6]तृतीया समर्थविभक्तिः । व्रातशब्दात् तृतीयासमर्थात् जीवति इत्यस्मिन्नर्थे [7]खञ् प्रत्ययो भवति । नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनः सङ्घाः व्राताः (म.भा. २.३७४) । उत्सेधः शरीरं, [8]तदायास्य ये जीवन्ति ते उत्सेधजीविनः, तेषां कर्म व्रातम् । तेन व्रातेन जीवति व्रातीनः । तेषामेव व्रातानामन्यतम उच्यते । यस्त्वन्यस्तदीयेन[9] जीवति तत्र नेष्यते ॥

## साप्तपदीनं सख्यम् । (२२/१८२३)

साप्तपदीनम् इति निपात्यते [10]सख्येऽभिधेये । सप्तभिः पदैरवाप्यते साप्तपदीनम् । सख्यं [11]जनाः साप्तपदीनमाहुः । कथं [12]साप्तपदीनः सखा, साप्तपदीनं मित्रम् इति ? [13]यदा गुणप्रधानः साप्तपदीनशब्दः [14]सखिभावे [6]तत्कर्मणि च [16]वर्तते तदा सख्यशब्देन सामानाधिकरण्यं भवति, यदा तु लक्षणया[17] वर्तते [18]तदा पुरुषेण [19]सामानाधिकरण्यं भवति ॥

## हैयङ्गवीनं सञ्ज्ञायाम् । (२३/१८२४)

हैयङ्गवीनं[20] निपात्यते सञ्ज्ञायां विषये । ह्योगोदोहस्य हियङ्गवादेशः, तस्य विकारे (म.भा. २.३७५) खञ् [21]प्रत्ययो भवति [22]सञ्ज्ञायाम् । ह्योगोदोहस्य विकारः हैयङ्गवीनम्[23] । घृतस्य[24] सञ्ज्ञा । [25]तेनेह न भवति, ह्योगोदोहस्य विकार उदश्वित्[26] (म.भा. २.३७५) ॥

## तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । (२४/१८२५)

तस्य इति षष्ठीसमर्थेभ्यः पील्वादिभ्यः [27]कर्णादिभ्यश्च यथासङ्ख्यं पाकमूलयोरर्थयोः कुणप् जाहच् इत्येतौ प्रत्ययौ भवतः । पीलूनां पाकः[28] पीलुकुणः । कर्कन्धुकुणः । कर्णादिभ्यः – कर्णस्य मूलं कर्णजाहम्[29] ।

पीलु । [30]कर्कन्धु । शमी । करीर । कुवल । बदर । अश्वत्थ । खदिर । पील्वादिः ।

कर्ण । अक्षि । नख । मुख । [31]मख । केश । पाद । गुल्फ । [32]भ्रूभङ्ग । दन्त । ओष्ठ । [33]पृष्ठ । [34]अङ्गुष्ठ । कर्णादिः[35] ॥

---

1. विरूपमित्यर्थः इत्यधिकम फ. 2. शालीनकौपीनशब्दौ फ. 3. तौ इत्यधिकम् फ. 4. खप्रत्ययः
फ. 5. अकार्यम् क. 6. तृतीया नास्ति फ. 7. खप्रत्ययः फ. 8. तदायासेन ब. क. ड. 9. कर्मणा
इत्यधिकम् ब.क.ड.ह. 10. सख्यं चेत् तद् भवति फ.ह. 11. जनाः नास्ति ड. फ. 12. साप्तपदीनः सखा
नास्ति फ. 13. यदा नास्ति ड, धर्मधर्मिणोरभेदोपचारात् इत्यधिकम् ह. 14. सखिभावेन क. 15. सत्कर्मणि प्रा.भा.
16. वर्तमानः ब क.ड.ह. 17. तद्वति इत्यधिकम् ब.क.फ.ह 18. तस्य ड. 19. समानाधिकरणो ब. क. 20. इति
इत्यधिकम् ब.ड.फ. 21. च इत्यधिकम् ह. 22. सञ्ज्ञायाम् नास्ति फ. 23. घृतम् इत्यधिकम् क.ड.ह. 24. इयम्
इत्यधिकम् ब.ड.फ.ह, एषा इत्यधिकम् क. 25. तेन नास्ति क.फ. 26. इति इत्यधिकम् क.फ.ह. 27. कल्कादिभ्यः ह.
28. परिणामः इत्यधिकम् क.ड. 29. अक्षिजाहम् इत्यधिकम् ब.क.ड. 30. कर्कन्धू ड. 31. मख नास्ति ब.
क.ड.ह. 32. भ्रू । शृङ्ग क.ड, भानु शृङ्गा ह. 33. पुष्प क.फ. 34. अङ्गुष्ठ नास्ति फ. 35. आकृति-
गणश्चायम् इत्यधिकम् ग.